महाभारते उपमालङ्कारः

गुरुकुल कांगड़ी विश्वविद्यालयो हरिद्वारम्
पी-एच०डी० उपाधये प्रस्तावितः

शोध-प्रबन्धस्य सारः

निर्देशिका
श्रीमती डा० सूनृता विद्यालंकारः
(एम०ए०, पी-एच०डी०)
रीडर व प्राचार्या
कन्या गुरुकुल महाविद्यालयः
हरिद्वारम्

शोधार्थिनी
नितिका चौहान
संस्कृत-विभागः
कन्या गुरुकुल महाविद्यालयः
हरिद्वारम्

संस्कृत विभागः
कन्या गुरुकुल महाविद्यालयः हरिद्वारम्
गुरुकुल कांगड़ी विश्वविद्यालयः
हरिद्वारम् - उत्तरांचलम्

2002

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते उपमालङ्कारः

गुरुकुल कांगड़ी विश्वविद्यालयो हरिद्वारम्
पी-एच०डी० उपाधये प्रस्तावितः

शोध-प्रबन्धस्य सारः

126246

नितिका चौहान
शोधार्थिनी
नितिका चौहान
संस्कृत-विभागः
कन्या गुरुकुल महाविद्यालयः
हरिद्वारम्

निर्देशिका
श्रीमती डा० सूनृता विद्यालंकारः
(एम०ए०, पी-एच०डी०)
रीडर व प्राचार्या
कन्या गुरुकुल महाविद्यालयः
हरिद्वारम्

प्राचार्या
कन्या गुरुकुल महाविद्यालय (अन्तर्गत)
गुरुकुल काँगड़ी विश्वविद्यालय, हरिद्वार

27.12.02

संस्कृत विभागः
कन्या गुरुकुल महाविद्यालयः हरिद्वारम्
गुरुकुल कांगड़ी विश्वविद्यालयः
हरिद्वारम् - उत्तरांचलम्

2002

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते उपमालङ्कारः

शोध-प्रबन्धस्य सारः

प्राक्तन भारतीय संस्कृति शौर्यौदार्य-दया-दाक्षिण्यादि-गुण-ग्राम विभूषितां सर्वथा विभ्रत कृत-प्रतिबिम्ब समर्पणं दर्पणमिव देदीप्यते महाभारतम् । महाभारतमार्यसंस्कृतेः भारतीय सनातनधर्मस्य चैकमत्यन्तमादरणीयं महत्प्रमुखं ग्रन्थरत्नमस्ति । एतदमूल्य रत्नानामपारभाण्डारं वर्तते । भारतीय समाजे धार्मिक दृष्ट्या यथाऽयं ग्रन्थः प्रामुख्यवाहति तथैव काव्य शास्त्र दृष्ट्याऽपि नास्ति कथञ्चिद् न्यूनः । अलंकाराः काव्ये प्रमुखाः भवन्ति ।

अलंकाराणां प्रयोगे व्यासेन स्वकीय सूक्ष्म मर्मज्ञतायाः परिचयः दत्तः। तस्य कविता अलङ्कारभारेण आक्रान्ता वनिता इव मन्दमन्थरगतिगामिनी नैवास्ति अपितु ज्योत्स्ना इव स्वसहज सौन्दर्येण सहृदयानां हृदयमाह्लादयति।

महाभारते शब्दालङ्काराणामपेक्षया अर्थालङ्काराणां बाहुल्यमस्ति । तस्य शाब्दिकचित्राणि सजीवानि स्वाभाविकानि च सन्ति । उपमालङ्कारप्रयोगे तस्य नैपुण्यं विशेषरूपेण दृश्यते । अलंकारयोजनायां कवेः कोऽपि प्रयासः न आसीत् । रसाक्षिप्तया यस्य बन्धः काव्ये स्वतः सम्पन्नो भवति स्म । स एव अलङ्कारो व्यासेन सम्मतः आसीत् । यथा

'' युष्मानेते वहिष्यन्ति रथाः पञ्च हिरण्मयाः ।
उच्चैः सन्तः प्रकाशन्तो ज्वलन्तोऽग्निशिखा इव ।।''

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

महाभारते अलंकाराः शब्दार्थयोः शोभां विवर्धयन्तो रसस्योपकारकाः सन्ति । रसस्याभिव्यञ्जनायां च सहायकाः सन्ति । मम्मटाचार्येण अलङ्काराणां विषये प्रोक्तम् -

"उपकुर्वन्ति तं सन्तं येऽङ्गद्वारेण जातुचित् ।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः" ।।

इदं तु सर्वग्राह्यतथ्यमस्ति यत् महाभारतः एकः विशालकायः ग्रन्थोऽस्ति । अत्र काव्य सौन्दर्यस्य समग्रतत्वानां वर्णनं प्रचुरमात्रायामारित। भाषाभाव छन्दालङ्काराणां प्रयोगस्य दृष्ट्या ग्रन्थस्य सौन्दर्यः अनुपमः अस्ति। अस्य महान्ग्रन्थस्येके अतिसूक्ष्मपक्षे मया किञ्चिदन्वेषणस्य प्रयासः कृतः । उपमालङ्कारस्योपस्थितिः प्रायः सर्वेषु काव्येषु अत्यधिकायां मात्रायां दृश्यते । अत्र ग्रन्थस्य दीर्घकारत्वादुपमायाः असंख्यानि निदर्शनानि दृष्टिपथे अवतरन्ति ।

अस्मिन् शोध प्रबन्धे अष्टाध्यायेषु उपमालङ्कारस्य निदर्शनानां निर्देशमस्ति । अध्यायानां विषयस्यानुसारमेव तेषु उपमायाः नानाविधरूपाणि दृश्यन्ते । प्रत्येके अध्याये त्रयाणां पर्वाणां समावेशः अस्ति । येषामन्तर्गतं क्रमबद्धरूपेण उपमायाः निरूपणं कृतं । महाभारते कोऽपि पर्वः उपमायाः पूर्णतः रहितः न दृश्यते ।

प्रथम अध्याये वेदव्यासस्य परिचयः , महाभारतस्य सामान्यपरिचयः , महाभारतस्य त्रीणि नामानि तेषां स्वरूपाणि , संस्कृत साहित्ये महाभारतस्य स्थानम् , काव्यशास्त्रदृष्ट्या महाभारतस्य वैशिष्ट्यम च इत्यादिनां प्रसङ्गानां सम्पादनमस्ति । अपि च महाभारते अलङ्काराः, अलङ्कारस्य सामान्यलक्षणम् , अलङ्काराणां भेदाः च तत्पश्चात् विषयानुरूप उपमाशब्दस्य व्युत्पत्तिः , उपमालङ्कारस्य लक्षणम् , साधर्म्यस्यार्थः , उपमालङ्कारस्य भेदाः महत्त्वं च आदिनां संकलनमस्ति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपमालङ्कारविषये विविधानाम् आलङ्कारिकाणां सिद्धान्तानाम् अवलोकनमस्ति । अलंकारशास्त्रप्रवीणैराचार्यैरूपमालङ्कारस्य काव्यशास्त्रेषु अतीव महत्त्वं प्रदर्शितं विद्यते । एतस्माद् उपमालङ्कारोऽलङ्कारेषु शिरोमणिः । महाभारतेऽपि उपमायाः प्रयोगाः बाहुल्येन दरीदृश्यन्ते ।।

द्वितीयेऽस्मिनध्याये आदिपर्वणि , सभापर्वणि , वनपर्वणि च उपमालङ्कारस्य प्रयोगः निर्दिष्टः । त्रिषु अपि पर्वेषु उपमायाः प्रयोगमति मनोहररूपे नैपुण्येन सह कृतं ग्रन्थकारेण । कतिचितानि उपमानानि तु पुनः पुनः प्रयुक्तानि। प्रायः प्रत्येके राजा इन्द्रेण उपमितः अस्ति । राजपुत्राः देवकुमारैः शोभनस्त्रियः च अप्सराभिः उपमिताः । महिषयः शचीतुल्याः कथिताः । ऐश्वर्यस्योपमा कुबेरस्य समृद्धया दत्तास्ति ।

प्रत्येका शोभना नगरी अमरावती सदृशा कथिता । नृपाणामोपमा पित्रा सह दत्तास्ति प्रजाः च पुत्रतुल्याः कथिताः । उच्चता मेरूपर्वतेनोपमिता । अश्वानां गतिः मनसः वायोः च गतिना उपमिता । क्रुद्धवीराणामोपमा अन्तकेन सह दत्तास्ति तेजयुक्ताः जनाः अग्नितुल्याः सूर्यसदृशाः च वर्णिताः। गम्भीरंस्वरस्योपमा मेघनिस्वनेन कृता। सौन्दर्यः चन्द्रतुल्यः कथितः । स्त्रियः पूर्णचन्द्रतुल्यमुखयुक्ताः कथिताः । तासां कोमलाङ्गानि कमलगर्भाभया सह उपमितानि । मनोहारिणीस्त्रयः विद्युत्सौदामनीव कथिताः देवकन्याभिः सह चोपमिताः । वीराः परिघतुल्यभुजानां स्वामिनः कथिताः । प्रलयकालीनाग्निः विद्युत् च अपि उपमानरूपे प्रस्तूयेते।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्यस्मिनध्याये अनेकानि उपमानानि दृश्यन्ते । यैः भाषासौन्दर्ये अतीववर्वृद्धिर्भवति भावानां सौन्दर्यं च पराकाष्ठां प्राप्नोति । उपमालङ्कारस्य नानाविधभेदानि अत्र प्रयुक्तानि येषां सौन्दर्यः जनानां मनांसि हरति तान् मन्त्रमुग्धं च करोति ।

तृतीयोऽध्याये विराटपर्वणि , उद्योगपर्वणि , भीष्मपर्वणि च उपमायाः निरूपणं कृतं । यथास्य पर्वस्य नाम्ना एव सूच्यते अत्र युद्धवर्णनानां प्रमुखता अस्ति । युद्धवर्णनेषु एका स्वाभाविका प्रवृत्तिरियमस्ति यत् एका एव उपमा पुनः पुनः प्रयुङ्क्ते । अत्रास्मिन्पर्वणि बहवानामुपमानां आवृत्तिः दृश्यते । वायुः , मेघः , पर्वतः, जलम् , अशोकवृक्षः , कर्णिकारः , सूर्यः , चन्द्रः , इन्द्रः , देवसेना , दैत्यसेना , कालः , मृत्युः , यमः , रूद्रः विद्युदादीनामुपमानां प्रयोगं पुनः पुनः अस्ति किन्तु प्रत्येकस्थले ते अधिकतरेव मनोहराः दृश्यन्ते । भाषायाः समृद्धयां भावानां ग्रहणे च साहायिकाः भवन्ति ।

चतुर्थोऽस्मिनध्याये द्रोणपर्वणि , कर्णपर्वणि शल्यपर्वणि च उपमायाः निदर्शनं कृतं । एषु त्रिषु अपि पर्वसु उपमालङ्कारस्य प्रयोगः प्रचुरतया दृश्यते । युद्धवर्णनानां प्रचुरतात्वाद् अधिकांशोपमानानि युद्धसम्बन्धितान्येव सन्ति । युद्धे सम्मिलितस्य प्रत्येकस्य वस्तुनः उपमा केनापि वस्तुना अवश्यमेव दत्तास्ति । गजानाम् , अश्वानां रथानां , पदातिसैनिकानां शूरवीराणां तेषां नादस्य तेषां प्रहाराणां तेषां आभूषणानां तेषां रथध्वजानां, तेषां विभिन्नावस्थानां युद्ध भूमेः दशायाः च नानाविधोपमानानि अत्र प्रयुक्तानि । येषां यथा संभवसङ्ग्रहः क्रियतेऽत्रास्मिनध्याये । अत्र उपमालङ्कारस्य प्रयोगं भाषायां भावानां च सौन्दर्यं वर्धयति । येन युक्तः ग्रन्थः पाठकानां हृदयाह्लादे शक्यो भवति ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

पञ्चमोऽध्याये सौप्तिक पर्वणि , स्त्रीपर्वणि शान्तिपर्वणि च उपमालङ्कारस्योदाहरणानां सङ्कलनं कृतमस्ति । सौप्तिक पर्वणि उपमाः प्रसंगे द्रोणपुत्रस्य प्रतिशोध भावना वर्णिता । स्वस्य पितुः छलपूर्वकवधस्य वृत्तान्तं ज्ञात्वा साति क्षुब्धोऽस्ति तस्मिन्मनसि च क्रूरसङ्कल्पस्योदयः भवति । अश्वत्थामा शिवस्य स्तुतिं करोति याप्यस्मिन्पर्वणि वर्णिता । स्त्रीपर्वणि महाभारतयुद्धे अधिकांशपुरूषाः कालग्रासाः अभवन् पश्चात् स्त्रीणां विलापस्य कारणादेवास्य पर्वस्य नामकरणमित्थं कृतं । पर्वस्य प्रारम्भे धृतराष्ट्रस्य विलापः वर्णितः तस्य शतानां पुत्राणां

वधस्य पश्चात् धृतराष्ट्रस्य अवस्था तथैव अभवत् यथा शारवारहित वृक्षस्य अवस्था । शान्तिपर्वस्याकारः अन्यपर्वेभ्यः दीर्घतरः अस्ति । अत्र त्रयाणां पर्वाणां समावेशः अस्ति । राजधर्मानुशासनपर्वः, आपद्धर्मपर्वः मोक्षधर्मपर्वः च एषु त्रिषु अपि पर्वसु मानवजीवनाय शान्तिप्रदायकानामुपदेशानां संग्रह अस्ति । सौप्तिकपर्वः स्त्रीपर्वः च आकार दृष्ट्या लघू स्तः । अतः तत्र अस्यालङ्कारस्योदाहरणान्यपि अल्पान्येव सन्ति । किन्तु शान्तिपर्वणि अस्य प्रयोगः प्रचुरमात्रायां दृश्यते । अत्र सूर्यः , अग्नि , मनः, वायुः , इन्द्रादयः उपमानरूपे प्रयुक्ताः सन्ति । कतिचित्स्थानेषु तु उपमायाः सौन्दर्यमद्वितीयमस्ति ।

षष्ठोऽस्मिनध्याये अनुशासनपर्वणि उपमायाः आश्वमेधिकपर्वणि उपमायाः आश्रमवासिकपर्वणि उपमायाः च प्रयोगं वर्णितमस्ति । अस्मिनध्याये त्रयाणामपि पर्वाणामाकारः अतिदीर्घः न अस्ति । अतः उपमालंकारस्य निदर्शनान्यप्यमात्रायामेवोपलब्धानि सन्ति । तथापि अस्य प्रयोगः तु दृश्यते एव ।

अस्मिन्पर्वणि द्वे उपपर्वे स्तः -

(१) दानधर्मपर्वः (२) भीष्मस्वर्गारोहण पर्वः

एतयो द्वयोऽपि पर्वयोः ग्रन्थकारेण उपमालङ्कारस्य प्रयोगः कृता । आकारदृष्ट्या दानधर्मपर्वः भीष्मस्वर्गारोहणपर्वात् दीर्घतरः अस्ति । अतः तत्र उपमायाः अधिकानि निदर्शनानि दृश्यते ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सप्तमोऽध्याये मौसलपर्वस्य , महाप्रस्थानिकपर्वस्य, स्वर्गारोहणपर्वस्य समावेशोऽस्ति । एतेषु त्रिष्वपि पर्वसु उपमालङ्कारस्य प्रयोगः अत्यल्पमात्रायामस्ति । अस्य मुख्यकारणमिदमस्ति यत् पर्वाणामाकारः लघ्वास्ति । मौसलपर्वणि उपमायाः एकं निदर्शनं दृश्यते । यत्र उपमानरूपे वज्रस्य वर्णमस्ति । अस्य पर्वस्यान्ते महाभारताध्ययनस्य महिमा गीता यस्याः प्रसङ्गे महाभारतस्य उपमा समुद्रेण हिमालयपर्वतेन च दत्ता -

यथा समुद्रो भगवान् यथा हि हिमवान् गिरिः ख्यातावुभौ रत्ननिधि तथा भारतमुच्यते । अस्य अध्यायस्यान्ते इदमेव कथितुमलमस्ति यत् पर्वाणां लघ्वाकारत्वादपि अत्र उपमालङ्कारस्य पूर्णतया अनुपस्थितः नास्ति। अन्ते शोधप्रबन्धस्य उपसंहारः अस्ति ।

महाभारते कोऽपि पर्वः उपमायाः पूर्णतः रहितः न दृश्यते । प्रत्येके स्थले उपमायाः एका भिन्ना नूतना च छविः दृश्यते । तस्याः प्रयोगेण भावनामुत्कृष्टता चरमोत्कर्षं प्राप्नोति । साधारणमपि कथनमियं चमत्कारपूर्णं करोति ।

इत्थं प्रायः प्रत्येके वर्णने उपमा अवश्यमेव दृश्यते। अतिसूक्ष्मवस्तूनि अपि उपमानरूपे वर्णितानि । अस्यालङ्कारस्य प्रयोगः भावग्रहणे अति सहायकः भवति । भावानां प्रकाशाय उपमा अति सहायका भवति । अतः अस्यालङ्कारस्य उपस्थितिः वर्णनां सौन्दर्ये अनुपमां वृद्धिं करोति ।

अस्मिन्ग्रन्थे उपमाप्रयोगः मया प्रकाशितः तु किन्तु मम मूढ़बुद्धयाः कारणात् तस्मिन्कर्मणि त्रुटयः अवश्यम्भाविनः सन्ति । अतः ताभ्यः त्रुटिभ्यः अहं विद्वज्जनैः क्षमार्हास्मि ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA